अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MV-201**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – मईमासः – 2019

## एम.ए. संस्कृत–व्याकरणम्, (सत्रम् : द्वितीयसत्रम)
## प्रथमपत्रम् – संस्कृतव्याकरणम् (क)

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. 'गाङ्कुटादिभ्योऽञ्णिन् ङित्' इति सूत्रं विधिर्वातिदेशो वा? कथञ्चेति? भाष्यरीत्या विव्रियताम्।
2. नवसूत्री का? क्व सा पठिता, क्व च पठितव्या? तत्र पाठे किं प्रयोजनम्?
3. अर्थवत्सूत्रे 'अप्रत्ययः' इति पर्युदास आहोस्वित् प्रसज्यः?
4. 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इति सूत्रं कर्त्तव्यं न वेति भाष्यानुसारितया बोधयन्तु।

### खण्डः ख
### (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. 'अव्याहताः कला यस्य कालशक्तिमुपाश्रिताः' इति पद्यस्य व्याख्यानं कुर्वन्तु।
2. शब्दस्य भेदद्वयविषये वाक्यपदीयरीत्या विविच्यताम्।
3. व्याकरणं नाम स्मृतिः। कथम्? किञ्चास्या मुख्यः विषयः?
4. व्याकरणस्य अर्थतत्त्वविज्ञाने किं माहात्म्यम्?
5. वाचश्चत्वारो विभागाः के? को भेदस्तत्र?
6. 'साधवो धर्मसाधनम्' इतिवाक्यांशं व्याख्यायताम्।
7. 'अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते' इति वाक्यस्य कोऽभिप्राय इति स्पष्टीकुर्वन्तु।

### खण्डः ग
### (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(10×01=10)**

1. 'निचुकुटिषति' इत्यत्र कस्माद्धातोः कः प्रत्ययः?
2. 'व्यक्तिवचने' इति पदस्य कोऽर्थः ?
3. तिष्यपर्नुवस्वोरितिसूत्रे नक्षत्रपदस्य किं प्रयोजनम् ?
4. 'द्रव्याभिधानं व्याडिः' इत्यस्य कोऽर्थः ?
5. 'वृद्धो यूनेति सूत्रे तल्लक्षणशब्दस्य कोऽर्थः ?

6. 'विशेषणानां चाजातेः' इत्यत्र पदच्छेदं बोधयन्तु ?
7. सरूपाणामिति सूत्रे 'एकविभक्तौ' इति किमर्थमुच्यते ?
8. 'बहुवृषलीकः' इत्यत्र कस्तद्धितः? केन सूत्रेण ?
9. 'गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्' इत्यत्र टाङ्शब्देन किं गृह्यते ?
10. 'ज्ञापकान्न परोक्षायाम्' इत्यत्र परोक्षाशब्दस्य कोऽर्थः ?
11. 'अस्राक्षीत्' इतिपदस्य परिचयं कारयन्तु ?
12. 'समाहारः स्वरितः' इत्यत्र कस्य समाहारो विवक्षितः ?
13. तत्पुरुषः समानाधिकरणकर्मधारयः इत्यत्र 'समानाधिकरणः' इतिपदस्य कोऽर्थः ?

## खण्डः घ

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(10×01=10)**

1. तृषिमृषिसूत्रे काश्यपग्रहणं किमर्थम् ?
   (अ) पूजार्थम् (ब) विकल्पार्थम्
   (स) उभयार्थम् (द) किन्निवृत्यर्थम्
2. 'न क्त्वा सेट्' इत्यत्र क्त्वाग्रहणेन वस्तुतः कस्य निवृत्तिः क्रियते ?
   (अ) गुधितः (ब) पपिवान्
   (स) जग्मिवान् (द) निगृहीतिः
3. 'इको झल्' इत्यनेन कित्त्वविधानस्य किं प्रयोजनम् ?
   (अ) गुणनिषेधः (ब) दीर्घत्वनिषेधः
   (स) णिलोपः (द) वृद्धिनिषेधः
4. 'अश्वत्' इति कुत्रत्यः प्रयोगः ?
   (अ) लङः (ब) लुङः
   (स) लिङः (द) लृङः
5. फाण्टाहृतेरपत्यं माणवकः ..........
   (अ) फाण्टाहृतिः (ब) फाण्टाहृतः
   (स) फाण्टाहृतीयः (द) फाण्टाहृत्यः
6. एकविभक्तिः चापूर्वनिपाते इत्यत्र एकशब्दः .......
   (अ) सङ्ख्यावाची (ब) प्रधानवाची
   (स) नियतवाची (द) अन्यवाची
7. ह्रस्वो नपुंसके प्रातिपदिकस्य इत्यत्र प्रातिपदिकग्रहणम् ..............
   (अ) सुब्निवृत्त्यर्थम् (ब) समासनिवृत्त्यर्थम्
   (स) तिङ्निवृत्त्यर्थम् (द) कृन्निवृत्त्यर्थम्
8. 'उदिते पूर्वे फल्गुन्यौ' 'उदिताः पूर्वाः फल्गुन्यः' इत्यत्र कः साधुः ?
   (अ) पथमः (ब) द्वितीयः
   (स) उभयम् (द) उभयमपि न
9. काश्यपप्रतिकृतयः काः ?
   (अ) काश्यपाः (ब) काश्यपिकाः
   (स) काश्यपीयाः (द) काश्यपेयाः
10. माता च मातारौ चेत्यस्यां विवक्षायां कः प्रयोगः साधुः ?
    (अ) मातामातरः (ब) मातरः
    (स) मातारः (द) मातामातारः

---------------x---------------